दिनाङ्क : 16.09.25 सायम् - 06:20

मुख्यवार्ताः-

- गृहमन्त्रिणा अमितशाहेन मादकद्रव्यपरकं सङ्कटं सम्मुखीकर्तुं केन्द्रराज्ययोः समन्वयस्य आह्वानं कृतम् प्रोक्तञ्च मादकमुक्त-भारताभियानम् साम्प्रतं द्विसप्तत्यधिक-त्रिशत-जनपदेषु प्रचलति।

- केन्द्रीय-कृषिमन्त्रिणा शिवराज-सिंह-चौहानेन घोषितं यत् भारतेन पञ्चविंशत्याधिक-द्विसहस्त्र-षड्विंशति-वर्षाय च रबी-खाद्यान्न-उत्पादनस्य च लक्ष्यम् द्विषष्टयधिक-त्रिशतं-दशमलव पञ्चाशत् मिलियन-टन-परिमितम् निर्धारितम् ।

- उत्तराखण्डस्य कतिचित्स्थलेषु तीव्र-वृष्ट्या सामान्यं जनजीवनं बाधितम्। विभागेन देहरादूना-नैनीताल-चंपावत-जनपदेभ्यः तीव्र-वृष्ट्याः ऑरेंज-अलर्ट सञ्चेतना प्रसारिता।

- अमेरिकायां भारतस्य राजदूतः विनय-मोहन-क्वात्रा इत्येषः इसरो-नासा-सहभागितां भारत-अमेरिका-सहयोगस्य प्रमुखस्तम्भेषु अन्यतमास्ति इति प्रोक्तवान् ।

- भारत-दलस्य स्मृति-मंधाना महिला-क्रिकेट-एकदिवसीय-स्पर्धायां शीर्षस्थानं प्राप्तवती।

<u>शाह-मादकपदार्थः</u>

केन्द्रीय-गृहमन्त्री अमितशाहः अद्य नवदिल्ल्यां राज्यानां केन्द्रशासित-प्रदेशानाञ्च मादकपदार्थ-निरोधककार्यबलस्य प्रमुखाणां द्वितीय-राष्ट्रिय-सम्मेलनस्य उद्घाटनम् अकरोत्। अस्मिन् सम्मेलने षट्त्रिंशत्-राज्यानां केन्द्र-शासित-प्रदेशानाञ्च मादकपदार्थ-निरोधककार्यबलस्य प्रमुखान् अतिरिच्य अन्यसर्वकारीय-विभागानां हितधारकाः अपि भागं गृह्णन्ति। अत्रावसरे श्रीशाहः प्रोक्तवान् यत् सम्प्रति देशस्य द्विसप्तत्यधिक-त्रिशतजनपदेषु मादक-मुक्त-भारताभियानं प्रचाल्यते ।

<u>शिवराज-रबी</u>

केन्द्रिय-कृषि-कृषक-कल्याण-मन्त्रिणा शिवराज-सिंह-चौहानेन घोषितं यत् पञ्चविंशत्यधिक-द्विसहस्त्रवर्षात् षड्विंशत्याधिक-द्विसहस्त्रवर्ष-पर्यन्तं रबी-ऋतोः कृते खाद्यान्न-उत्पादनस्य राष्ट्रीय-लक्ष्यम् द्विषष्टयधिकत्रिशतं-दशमलव पञ्चाशत्-मिलियन-टन-परिमितम् निर्धारितम् अस्ति। तेन प्रोक्तं यत् कृषि-रबी-अभियानस्य पञ्चविंशत्यधिक-द्विसहस्त्रतमोऽपरि राष्ट्रिय-सम्मेलनावधौ राज्य-कृषि-मन्त्रिभिः सह चर्चायाः अध्यक्षतानन्तरं नव-दिल्ल्यां वार्ताहरस्य सम्मेलने एषा घोषणा समभवत् ।

<u>ऋतु-विज्ञान-विभागः</u>

उत्तराखण्ड-प्रदेशस्य विविधेषु जनपदेषु तीव्र-वृष्ट्या सामान्यं जनजीवनं अतिशयेन बाधितम्। पर्वतीय-प्रदेशेषु भूस्खलन-कारणात् अनेके मार्गाः अवरुद्धाः सन्ति, प्रदेशस्य प्रमुख-नद्यः सामान्य-स्तरात् ऊपरि प्वरहन्ति। राजधान्यां देहरादून-नगरे गतरात्रौ तीव्रवृष्टि-कारणात् सहस्त्रधारा-करलीगाड़-क्षेत्रे अनेकगृहाणि ध्वस्तानि जातानि।लोकप्रिय-पर्यटन-स्थलं सहस्त्रधारायां अपि महती क्षतिः समजायत । ऋतु-विज्ञान-विभागेन अद्य देहरादू-नैनीताल-चंपावत-जनपदेषु तीव्र-वृष्ट्या ऑरेंज-अलर्ट इति सञ्चेतना प्रसारिता सहैव अन्येषु क्षेत्रेषु अति-वृष्टेः संचेतना प्रदत्ता।

## इसरो-नासा

अमेरिकायां भारतस्य राजदूतः विनय-मोहन-क्वात्रा इत्येषः भारतीय-अन्तरिक्ष-अनुसन्धान-संस्थानस्य राष्ट्रीय-वैमानिकी-अन्तरिक्ष-प्रशासनस्य च मध्ये दीर्घ-फलदायिनीं च अन्तरिक्ष-सहभागितां रेखाङ्कितवान् । सहैव सः प्रोक्तवान् इयं सहभागिता भारत-अमेरिका-सहयोगस्य प्रमुखस्तम्भेषु अन्यतमास्ति । वाशिंगटन-नगरे भारत-अमेरिका-अन्तरिक्ष-सहयोग-कार्यक्रमे असौ प्रोक्तवान् यत् चन्द्रयान-अभियानम्, आर्टेमिस-सहयोगः, निसार-प्रक्षेपणं समेत्य विभिन्न-अभियानानां माध्यमेन अयं सहयोगः वर्धितः । सः उक्तवान् यत् भारतदेशः अष्टविंशत्यधिक-द्विसहस्रवर्षात् पञ्चत्रिंशत्यधिक-द्विसहस्रवर्षं यावत् मानवयुक्त-चन्द्रभियानं सहैव अन्तरिक्ष-स्थानकस्य च योजनां संकल्पयति, अस्मिन् अभियाने नासा-समवायः प्रमुख-सहभागी भविष्यति।

## प्रधानमन्त्री-भारती-योजना

प्रधानमन्त्रिणा नरेन्द्र-मोदिना अद्य केन्द्रीय-मन्त्रिणः मनसुख-माण्डविया इत्यस्य लेखः समाजिक-पटले प्रकाशितः। अस्मिन् सन्देशे 'सबका साथ, सबका विकास, सबका विश्वास, सबका प्रयास' इत्येषः घोषः जीवनस्य अङ्गं जातम् इत्यपि समुल्लिखितम्। लेखे निर्दिष्टम् यत् विद्युत् मौलिक-अधिकारः जातः, कल्याणप्रद-लाभाः साक्षात् प्रदीयन्ते, मूलभूत-संरचनायाः योजना डिजिटल-समन्वयेन निर्मीयते इति।

## विश्व-ओजोन-दिवसः

अखिले हि विश्वे अद्य विश्व-ओजोन-दिवसः आचर्यते। अस्य दिवसस्य उद्देश्यं तावत् पृथिव्यां जीवनस्य संरक्षणे ओज़ोन्-स्तरस्य महत्त्वपूर्ण-भूमिकायाः विषये जनाः जागरूकाः भवेयुः इति वर्तते । अवसरेऽस्मिन् नवदिल्ल्यां आयोजिते एकस्मिन् कार्यक्रमे वीडियो-सन्देशे केन्द्रीय-पर्यावरण-वन-जलवायु-परिवर्तन-मन्त्री भूपेन्द्र-यादवः प्रोक्तवान् यत्, भारतं शीतलन-कार्ययोजनायाः क्रियान्वयनेन विश्वस्मिन अन्यतमं स्थानं भजते । श्रीयादवः अवदत् यत्, भारतेन हैड्रोफ्लोरोकार्बन् इत्यस्य उत्पादने उपयोगे च सप्तषष्टि-दशमलव-पञ्चप्रतिशतं यावत् न्यूनीकरणे साफल्यं अधिगतम्।

## रेखा गुप्ता-अपोलो

दिल्ल्याः मुख्यमन्त्री रेखा-गुप्ता अद्य नवदिल्ल्यां महिलानां कृते समर्पितस्य एशिया-महाद्वीपस्य प्रथमस्य कर्करोग-केन्द्रस्य अपोलो-अथीन्ना इत्यस्य उद्घाटनम् अकरोत्। सा प्रोक्तवती यत् महिलानां स्वास्थ्यक्षेत्रे अपोलो-अथीन्ना-केन्द्रं महत्त्वपूर्णं स्थानम् आविष्करोति। श्रीमती गुप्ता अवदत् यत् एतेन न केवलं दिल्ल्याः महिलाः, अपितु देशस्य विश्वस्य च महिलाः अपि उपकृताः भविष्यन्ति।

## नड्डा-मेडटेक् फ़ोरम्-

स्वास्थ्यमन्त्री जगत्-प्रकाश्-नड्डा सबलं प्रोक्तवान् यत् मेडटेक्-क्षेत्रम् भारते स्वास्थ्यपरिवर्तनस्य प्रमुखः स्तम्भः वर्तते । श्रीनड्डा इत्यमुना नवदिल्लीतः वीडियो-सन्देशमाध्यमेन एकादशतमस्य एशिया-पेसिफिक्-मेडटेक-फ़ोरम् इत्यस्य उद्घाटनसत्रं सम्बोधयता एतत् प्रोदीरितम्। तेन अस्य क्षेत्रस्य विस्तृतक्षेत्रं प्रकाशितं, तत्र तावत् निदानं, उन्नतोपकरणानि, डिजिटल-स्वास्थ्यं , ए-आई-सञ्चालित-समाधानानि सम्मिलितानि सन्ति । अनेन स्वास्थ्य-सौविध्यं प्रत्येकस्मै नागरिकाय सुलभतरं मितव्ययी च भविष्यति। स्वास्थ्य-राज्यमन्त्रिणा अनुप्रिया-पटेल इत्यनया भारतस्य मेडटेक तथा चिकित्सा-उपकरण-क्षेत्रस्य सुदृढीकरणाय सर्वकारीय-प्रयासाः प्रकाशिताः । तया चिकित्सा-उपकरणेषु शत-प्रतिशतं प्रत्यक्ष-विदेशीय-निवेशं समेत्य सर्वकारस्य निवेशक-अनुकूल-नीतीनामुपरि अपि बलं प्रदत्तम् ।

## मॉरीशस

मॉरीशस-देशस्य प्रधानमन्त्री नवीनचन्द्र रामगुलामः अद्य नव-दिल्ल्याः राष्ट्रपति-भवने राष्ट्रपति द्रौपदी मुर्मू-वर्यया सह अमिलत्। राष्ट्रपतिना द्रौपदी-मुर्मू इत्यनया समाजिक-पटले एकस्मिन् सन्देशे विश्वासं प्रकटितं यत् प्रधानमन्त्रिणः रामगुलामस्य व्यापक-नेतृत्व-अनुभवेन भारत-मॉरीशस-देशयोःदीर्घकालिक-द्विपक्षीय-सम्बन्धः अधिकं सुदृढं भविष्यति। प्रधानमन्त्री रामगुलामः उपराष्ट्रपतिना सी.पी.राधाकृष्णन इत्यनेन सह मिलितवान्। मॉरीशस-देशस्य प्रधानमन्त्री अद्य स्वीयां अष्ट-दिवसीय-भारतयात्रां समापयिष्यति।

## इज़राइल-गाज़ा

संयुक्तराष्ट्र-अन्वेषण-आयोगेन आरोपितम् यत् इज़राइल-देशेन गाज़ाक्षेत्रे फ़िलिस्तीन-जनान् विरुध्य नरसंहारः कृतः। प्रतिवेदने प्रमाणितं यत् अन्ताराष्ट्रिय-विध्यन्तर्गतं नरसंहारस्य पञ्चसु घटनाक्रमेषु चत्वारः घटनाः त्रयोविंशत्यधिक-द्विसहस्रतम-वर्षात् अनन्तरं दुरापन्नाः । त्रयोविंशत्यधिक-द्विसहस्रतम वर्षस्य अक्टूबर-मासस्य सप्तम-दिनाङ्के फ़िलिस्तीनी-सशस्त्र-समूहस्य आतंकवादी-आक्रमणस्य प्रत्युत्तररूपेण इज़राइल-सेनया गाज़ा-प्रदेशे अभियानं आरब्धम्। इज़राइल-देशस्य विदेश-मन्त्रालयेन इदं प्रतिवेदनं मिथ्यात्वेन निराकृतम्, तथा संयुक्त-राष्ट्र-मण्डलस्योपरि हमास-समूहस्य दुष्प्रचारस्य समर्थनार्थं आरोपः प्रत्याक्षिप्तः।

## स्मृति-मंधाना

भारत-दलस्य स्मृति-मंधाना महिला-क्रिकेट-एकदिवसीय-स्पर्धायां शीर्षस्थानं पुनः प्राप्तवती। तया रविवासरे ऑस्ट्रेलिया-दलं विरुध्य क्रिकेट-श्रृङ्खलायाः प्रथमद्वन्द्वे उत्कृष्टं अर्धशतकं संस्थाप्य इंग्लैण्ड-देशस्य नैट-साइवर-ब्रंटं पृष्ठे परित्यक्ता।

। इति वार्ताः ।।